# Shivasankalpa Upanishad 2

# शिवसङ्कल्पोपनिषत् २

## Document Information

Text title : shivasankalpopaniShat 2

File name : shivasankalpopaniShat2.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti, NA

Description-comments : aprakAshitA upaniShadaH

Latest update : June 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 19, 2022

*sanskritdocuments.org*

# Shivasankalpa Upanishad 2

# शिवसङ्कल्पोपनिषत् २

ॐ येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्त्रायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ १॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति ।
यत्सम्मितमनु संयन्ति प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २॥ (यत्सम्मितं मनस्संचरंति)

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ४॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव । (मनुष्यान्मेनियुतेपशुभिर्वाजिनीव
)
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५॥ (हृत्प्रविष्टं, यदचरं)

यस्मिन्नृचःसामयजूँषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः । (प्रतिष्ठारशनाभाविभाराः)
यस्मिँश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६॥

यदत्र षष्ठं त्रिशतँसुवीरं यज्ञस्य गुह्यं नवनावमाय्यम् । (सुवीर्यं)
दश पञ्च त्रिँशतं यत्परं च तन्मे मनः शिवसङ्कल्पमस्तु ॥ ७॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । (सर्वंतत्सुप्तस्य)
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ८॥

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ९॥

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः ।

तदेवाग्निस्तमसो ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १०॥
(तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमास्तन्मे)

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः ।
ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ११॥

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत् ।
सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १२॥

एका च दश शतं च सहस्रं चायुतं च
नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च ।
समुद्रश्च मध्यं चान्तश्च परार्धश्च
तन्मे मनः शिवसङ्कल्पमस्तु ॥ १३॥

ये पञ्च पञ्चदश शतँसहस्रमयुतं न्यर्बुदं च ।
तेऽग्निचित्येष्टकास्तँ शरीरं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १४॥
(चित्तेष्टकास्तँ)

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
यस्य योनिं परिपश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु ॥ १५॥

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणुतमिन्दुम् । (यस्यैतं धीराः)
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १६॥

परात्परतरं चैव यत्पराच्चैव यत्परम् । (तत्पराच्चैव)
यत्परात्परतो ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १७॥

परात्परतरो ब्रह्मा तत्परात्परतो हरिः । (परात्परतरं ब्रह्म)
तत्परात्परतोऽधीशस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ १८॥ (यत्परात्परतोऽधीशं)

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी ।
ऋग्यजुस्सामाथर्वैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ १९॥

यो वै देवं महादेवं प्रयतः पुरुषोत्तमम् । (प्रणवश्शुचिः)
यः सर्वे सर्ववेदैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ २०॥

प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम् ।

ओङ्कारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु ॥ २१॥
योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।
अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसङ्कल्पमस्तु ॥ २२॥
गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसङ्कल्पमस्तु ॥ २३॥
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २४॥
कैलासशिखरे रम्ये शङ्करस्य शिवालये ।
देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ २५॥
कैलासशिखरावासा हिमवद्गिरि संस्थितम् ।
नीलकण्ठं त्रिनेत्रं च तन्मे मनः शिवसंकल्पमस्तु ॥ २६॥
विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सम्पतत्रैर्द्यावापृथिवी
जनयन् देव एकस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २७॥
चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः ।
इतिहासपुराणानां तन्मे मनः शिवसंकल्पमस्तु ॥ २८॥
मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मानोऽवधीः पितरं मोत मातरं प्रिया मानस्तनुवो
रुद्र रीरिषस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २९॥
मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो
नमसा विधेमते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३०॥
ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो
नमस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३१॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे ।
वोचेम शन्तमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय
नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३२॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।
स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
विवस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३३॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय
हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३४॥

य आत्मदा बलदा यस्य विश्वे उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय
हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३५॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश ।
तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३६॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियं
तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३७॥

नमकं चमकं चैव पुरुषसूक्तं च यद्विदुः ।
महादेवं च तत्तुल्यं तन्मे मनः शिवसंकल्पमस्तु ॥ ३८॥

य इदꣳ शिवसङ्कल्पꣳ सदा ध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३९॥

इति शिवसङ्कल्पोपनिषत् समाप्ता ।
(शैव-उपनिषदः)

# शिवसङ्कल्पोपनिषत् २

## शिवसङ्कल्पोपनिषत्

ॐ येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम् ।
येन यज्ञस्त्रायते सप्तहोता तन्मे मनः शिवसङ्कल्पमस्तु ॥ १॥

येन कर्माणि प्रचरन्ति धीरा यतो वाचा मनसा चारुयन्ति ।
यत्सम्मितमनु संयन्ति प्राणिनस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २॥ (यत्सम्मितं मनस्सञ्चरन्ति)

येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः ।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३॥

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु ।
यस्मान्न ऋते किञ्चन कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ४॥

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव । (मनुष्यान्मेनियुतेपशुभिर्वाजिनीवा
)
हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ५॥ (हृत्प्रविष्टं, यदचरं)

यस्मिन्नृचःसामयजूꣳषि यस्मिन् प्रतिष्ठिता रथनाभाविवाराः । (प्रतिष्ठारशनाभाविभाराः)
यस्मिꣳश्चित्तꣳ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ६॥

यदत्र षष्ठं त्रिशतꣳ सुवीरं यज्ञस्य गुह्यं नवनावमाय्यम् । (सुवीर्यं)
दश पञ्च त्रिꣳशतं यत्परं च तन्मे मनः शिवसङ्कल्पमस्तु ॥ ७॥

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति । (सर्वंतत्सुप्तस्य)
दूरङ्गमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ८॥

येन द्यौः पृथिवी चान्तरिक्षं च ये पर्वताः प्रदिशो दिशश्च ।
येनेदं जगद्व्याप्तं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु ॥ ९॥

येनेदं विश्वं जगतो बभूव ये देवापि महतो जातवेदाः ।

तदेवाग्निस्तमसो ज्योतिरेकं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १०॥
(तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदुचन्द्रमास्तन्मे)

ये मनो हृदयं ये च देवा ये दिव्या आपो ये सूर्यरश्मिः ।
ते श्रोत्रे चक्षुषी सञ्चरन्तं तन्मे मनः शिवसङ्कल्पमस्तु ॥ ११॥

अचिन्त्यं चाप्रमेयं च व्यक्ताव्यक्तपरं च यत ।
सूक्ष्मात्सूक्ष्मतरं ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १२॥

एका च दश शतं च सहस्रं चायुतं च
नियुतं च प्रयुतं चार्बुदं च न्यर्बुदं च ।
समुद्रश्च मध्यं चान्तश्च परार्धश्च
तन्मे मनः शिवसङ्कल्पमस्तु ॥ १३॥

ये पञ्च पञ्चदश शतꣳ सहस्रमयुतं न्यर्बुदं च ।
तेऽग्निचित्येष्टकास्तꣳ शरीरं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १४॥
(चित्तेष्टकास्तꣳ)

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
यस्य योनिं परिपश्यन्ति धीरास्तन्मे मनः शिवसङ्कल्पमस्तु ॥ १५॥

यस्येदं धीराः पुनन्ति कवयो ब्रह्माणमेतं त्वा वृणुतमिन्दुम् । (यस्यैतं धीराः)
स्थावरं जङ्गमं द्यौराकाशं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १६॥

परात्परतरं चैव यत्पराच्चैव यत्परम् । (तत्पराच्चैव)
यत्परात्परतो ज्ञेयं तन्मे मनः शिवसङ्कल्पमस्तु ॥ १७॥

परात्परतरो ब्रह्मा तत्परात्परतो हरिः । (परात्परतरं ब्रह्म)
तत्परात्परतोऽधीशस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ १८॥ (यत्परात्परतोऽधीशं)

या वेदादिषु गायत्री सर्वव्यापी महेश्वरी ।
ऋग्यजुस्सामाथर्वैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ १९॥

यो वै देवं महादेवं प्रयतः पुरुषोत्तमम् । (प्रणवश्शुचिः)
यः सर्वे सर्ववेदैश्च तन्मे मनः शिवसङ्कल्पमस्तु ॥ २०॥

प्रयतः प्रणवोङ्कारं प्रणवं पुरुषोत्तमम् ।
ओङ्कारं प्रणवात्मानं तन्मे मनः शिवसङ्कल्पमस्तु ॥ २१॥

योऽसौ सर्वेषु वेदेषु पठ्यते ह्यज ईश्वरः ।

अकायो निर्गुणो ह्यात्मा तन्मे मनः शिवसङ्कल्पमस्तु ॥ २२॥

गोभिर्जुष्टं धनेन ह्यायुषा च बलेन च ।
प्रजया पशुभिः पुष्कराक्षं तन्मे मनः शिवसङ्कल्पमस्तु ॥ २३॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २४॥

कैलासशिखरे रम्ये शङ्करस्य शिवालये ।
देवतास्तत्र मोदन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ २५॥

कैलासशिखरावासा हिमवद्गिरि संस्थितम् ।
नीलकण्ठं त्रिनेत्रं च तन्मे मनः शिवसंकल्पमस्तु ॥ २६॥

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सम्पतत्रैर्द्यावापृथिवी
जनयन् देव एकस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २७॥

चतुरो वेदानधीयीत सर्वशास्त्रमयं विदुः ।
इतिहासपुराणानां तन्मे मनः शिवसंकल्पमस्तु ॥ २८॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मानोऽवधीः पितरं मोत मातरं प्रिया मानस्तनुवो
रुद्र रीरिषस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ २९॥

मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तो
नमसा विधेमते तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३०॥

ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो
नमस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३१॥

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे ।
वोचेम शन्तमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय
नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३२॥

ब्रह्मजज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः ।

स बुध्निया उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
विवस्तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३३॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय
हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३४॥

य आत्मदा बलदा यस्य विश्वे उपासते प्रशिषं यस्य देवाः ।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय
हविषा विधेम तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३५॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवनाऽऽविवेश ।
तस्मै रुद्राय नमो अस्तु तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३६॥

गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीꣳ सर्वभूतानां तामिहोपह्वये श्रियं
तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३७॥

नमकं चमकं चैव पुरुषसूक्तं च यद्विदुः ।
महादेवं च तत्तुल्यं तन्मे मनः शिवसंकल्पमस्तु ॥ ३८॥

य इदꣳ शिवसङ्कल्पꣳ सदा ध्यायन्ति ब्राह्मणाः ।
ते परं मोक्षं गमिष्यन्ति तन्मे मनः शिवसङ्कल्पमस्तु ॥ ३९॥

इति शिवसङ्कल्पोपनिषत् समाप्ता ।
(शैव-उपनिषदः)

Verses 26 and 38 are not found in the referenced print.

Proofread by Kasturi navya sahiti, NA

*Shivasankalpa Upanishad 2*

pdf was typeset on June 19, 2022

Please send corrections to *sanskrit@cheerful.com*